# Mrityuproktam Shivarchanopadesham

# મૃત્યુપ્રોક્તં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Mrityuproktam Shivarchanopadesham

File name : mRRityuproktaMshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| vAvRittasholkAH||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 22, 2024

*sanskritdocuments.org*

# મૃત્યુપ્રોક્તં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

મૃત્યુરુવાચ
નિત્યં શિવેતિ મન્ત્રેણ પૂજયસ્વ સદાશિવમ્ ।
નૈતસ્માદુત્તમો મન્ત્રઃ શ્રેષ્ઠો વેદેષ્વપીરિતઃ ॥ ૩૪૮॥

અયમેવ મહામન્ત્રી મોક્ષદઃ શઙ્કરાત્મકઃ ।
અયમેવ સદા ધ્યેયો મન્ત્રો મુક્ત્યર્થિભિર્નરૈઃ ॥ ૩૪૯॥

એતન્મન્ત્રસ્ય મહાત્મ્યં શિવો વેદ ન ચેતરઃ ।
વેદૈરપિ ન વિજ્ઞાતં તત્ત્વમસ્ય મનોર્ધ્રુવમ્ ॥ ૩૫૦॥

એતસ્ય તત્ત્વં વિજ્ઞાતું યતન્તે યોગિનઃ સદા ।
તથાપિ તત્ત્વમેતસ્ય જ્ઞાતુમેવ ન શક્યતે ॥ ૩૫૧॥

તત્ત્વં તુ શિવમન્ત્રસ્ય યેન જ્ઞાતં ભવિષ્યતિ ।
તેન તીર્ણ ઇતિ જ્ઞેયો ઘોરસંસારસાગરઃ ॥ ૩૫૨॥

શિવેતિ યઃ પરો મન્ત્રઃ સ પરંબ્રહ્મ કથ્યતે ।
પરબ્રહ્મસ્વરૂપં તુ તતો જ્ઞાતું ન શક્યતે ॥ ૩૫૩॥

તથાપિ પરમો મન્ત્રઃ શિવમન્ત્રઃ શ્રુતિશ્રુતઃ ।
તતસ્તેનૈવ મન્ત્રેણ પૂજનીયઃ સદાશિવઃ ॥ ૩૫૪॥

નિત્યં મહેશપૂજા ચેત્ક્રિયતે ભક્તિપૂર્વકમ્ ।
તદા નશ્યન્તિ પાપાનિ બુદ્ધિપૂર્વકૃતાન્યપિ ॥ ૩૫૫॥

બિલ્વપત્રૈર્મહાદેવં યઃ પૂજયતિ શઙ્કરમ્ ।
સ વિધાયાપિ પાપાનિ ન પ્રાપ્નોત્યેવ તત્ફલમ્ ॥ ૩૫૯॥

નવ્યૈર્બિલ્વદલૈરીશં સમ્પૂજયતિ યઃ પુમાન્ ।
સ વંશકોટિસંયુક્તઃ શિવલોકં પ્રયાસ્યતિ ॥ ૩૬૯॥

બિલ્વપત્રૈર્મહાદેવં ભસ્મધારણપૂર્વકમ્ ।
યઃ પૂજયતિ યત્નેન સ સમ્પ્રાપ્નોતિ શઙ્કરમ્ ॥ ૩૭૦॥

દુઃખં ચ મમ નાસ્ત્યેવ શાઙ્કરે શક્તિકુણ્ઠનમ્ (ને) ।
મમાપિ શાસકા યસ્માચ્છાઙ્કરાઃ શઙ્કરપ્રિયાઃ ॥ ૩૭૪॥

ન મૃત્યુભયમાપ્નોતિ શ્રીમૃત્યુઞ્જયપૂજકઃ ।
સર્વથા સત્યમિત્યાહ જાબાલોપનિષત્સ્વયમ્ ॥ ૩૭૫॥

અશાઙ્કરાર્થે સૃષ્ટોઽસ્મિ શઙ્કરેણ પુરા તતઃ ।
અશાઙ્કરેષુ મે શક્તિઃ કુણ્ઠિતા ન ભવિષ્યતિ ॥ ૩૭૬॥

પ્રાપ્યં મૃત્યુકૃતં દુઃખમમૃત્યુઞ્જયપૂજકૈઃ ।
મૃત્યુઞ્જયારાધકૈસ્તુ તન્નૈવ પ્રાપ્યતે ધ્રુવમ ॥ ૩૭૭॥

મૃત્યુઞ્જયાન્યાઃ સર્વેઽપિ જન્મમૃત્યુજરાદિભિઃ ।
પુનઃ પુનઃ પરિક્રાન્તાઃ દુઃખિતાઃ સન્તિ સર્વથા ॥ ૩૭૮॥

નિત્યમવ્યભિચારેણ પ્રમાદેનવિના શિવમ્ ।
યઃ પૂજયતિ યત્નેન સ ન જન્માદિભાગ્ધ્રુવમ્ ॥ ૩૭૯॥

દદાતિ સ્વેચ્છયા લોકાન્સૃષ્ટ્વા પાતિ ચ હન્તિ ચ ।
સંહારેચ્છા યદા શમ્ભોઃ સર્વજ્ઞસ્યામિતૌજસઃ ॥ ૩૯૦॥

તદા સંહૃત્ય સકલં સ્વયમેકોઽધિતિષ્ઠતિ ।
સિસૃક્ષયા પુનઃ સામ્બઃ સૃષ્ટ્વા સર્વમિદં જગત્ ॥ ૩૯૧॥

સ એવ પાલનેચ્છયાં પાલયત્યેવ શઙ્કરઃ ।
ઉત્પત્તિસ્થિતિસંહારા જાયન્તે શઙ્કરેચ્છયા ॥ ૩૯૨॥

તત્ર યત્નં મહાદેવો ન કરોત્યેવ સર્વથા ।
શિવેચ્છયૈવ કાર્યાણિ સિધ્યન્ત્યાભૂતસમ્પ્લવમ્ ॥ ૩૯૩॥

તથા ચ યત્નં કુત્રાપિ ન કરોત્યેવ શઙ્કરઃ ।
તત્રૈવ યત્નઃ ક્રિયતે સ્વેચ્છયા યન્ન સિધ્યતિ ॥ ૩૯૪॥

સ્વેચ્છામાત્રેણ સિદ્ધેઽર્થે ન યત્નસ્ય પ્રયોજનમ્ ।
દેવતાસાર્વભૌમસ્ય સ્વતન્ત્રસ્ય પિનાકિનઃ ॥ ૩૯૫॥

ઇચ્છામાત્રેણ સિધ્યન્તિ સર્વકાર્યાણિ સર્વદા ।
એતાદૃશં મહાદેવમપ્રમાદેન સર્વથા ॥ ૩૯૬॥

યઃ પૂજયતિ યત્નેન સ સંસારં તરિષ્યતિ ।
સંસારતરણોપાયઃ શઙ્કરસ્યૈવ પૂજનમ્ ॥ ૩૯૭॥

યતઃ સ શઙ્કરઃ સામ્બો ભક્તસંસારતારકઃ ।
પરન્ત્વવ્યભિચારેણ શઙ્કરસ્યૈવ પૂજનમ્ ॥ ૩૯૮॥

યઃ કરોતિ સ સંસારં તરત્યેવ હિ સર્વથા ।
સંસારતરણાપેક્ષા યસ્ય જન્તોર્ભવિષ્યતિ ॥ ૩૯૯॥

તેન સર્વાત્મના ત્યાજ્યં શિવાન્યસુરપૂજનમ્ ।
શઙ્કરાન્યે સુરાઃ સર્વે યતઃ સંસારિણસ્તતઃ ॥ ૪૦૦॥

તદર્ચનં તુ સંસારતારકં મ ભવિષ્યતિ ।
યેન તીર્ણઃ સ સંસારઃ સોઽન્યં તારયિતું ક્ષમઃ ॥ ૪૦૧॥

સંસારિણં ન સંસારી તારયિષ્યતિ સર્વથા ।
અન્ધો યથાન્ધસંલગ્નઃ પતત્યેવ પદે મદે ॥ ૪૦૨॥

તથા પતતિ સંસારે શઙ્કરાન્યસુરાર્ચકઃ ।
શિવઃ પશુપતિર્નિત્યઃ પશુપાશવિમોચકઃ ॥ ૪૦૩॥

યતઃ પશુપતિર્દૃષ્ટઃ પશુપાશવિમોચકઃ ।
વિષ્ણુબ્રહ્માદયો દેવા મર્ત્યાશ્ચ પશવઃસ્મૃતાઃ ॥ ૪૦૪॥

તત્પાશમોચકો દેવઃ શિવઃ પશુપતિઃ સ્મૃતઃ ।
તેષાં પશૂનાં પાશો યઃ સ સંસારસ્તથા સતિ ॥ ૪૦૫॥

તન્મોચકો મહાદેવાદપરો નાસ્તિ સર્વથા ।
પશુવાશવિમોક્ષાય સેવ્યઃ પશુપતિઃ સદા ॥ ૪૦૬॥

તસ્માત્પશુપતિં સામ્બં પશુપાશવિમોચકમ્ ।
પૂજયસ્વાપ્રમાદેન નિત્યમવ્યભિચારતઃ ॥ ૪૦૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મૃત્યુપ્રોક્તં શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩। વાવૃત્તશ્લોકાઃ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . vAvRRittashlokAH..

Notes:

Mṛtyu મૃત્યુ delivers Upadeśa ઉપદેશ (to Bhilla ભિલ્લ) about the merits of worshiping Śiva શિવ especially with Śiva Mantra શિવ મન્ત્ર that itself is Parama Brahma પરમ બ્રહ્મ.
Mṛtyu મૃત્યુ highlights the importance of worshiping Śiva શિવ as Mṛtyuñjaya મૃત્યુઞ્જય and Paśupati પશુપતિ.

Proofread by Ruma Dewan

---

*Mrityuproktam Shivarchanopadesham*

pdf was typeset on June 22, 2024

Please send corrections to *sanskrit@cheerful.com*